समूहः। इति हेमचन्द्रः ॥*॥ सभायां एकाकि-
गमननिषेधो यथा,—
"नैकश्चरेत् सभां विप्रः समवायञ्च वर्ज्ज-
येत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
सभाज, ऋ क सेवने। प्रीतौ। दर्शने। इति
कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-
सेट्।) असभाजत्। इति दुर्गादासः ॥
सभाजनं, क्ली, (सभाज ऋ क सेवने प्रीतौ+
ल्युट्।) गमनागमनादिसमये सुहृदादेः आ-
लिङ्गनारोग्यप्रश्नस्वागतादिनानन्दोत्पादनम्।
तत्पर्य्यायः। आनन्दनम् २ आप्रच्छनम् ३।
इत्यमरः ॥ टु नदि संहृषि सभाज ऋ क
सेवनप्रीतिदर्शने प्रच्छी श ज्ञीप्से अनट्।
नन्दतिः पृच्छतिश्चाङ्पूर्व्वालिङ्गनादाविति
सुभूतिः। गमनसमये सुहृदमालिङ्ग्य गमना-
नुज्ञाग्रहणम्। आगतस्य वा स्वागतारोग्यादि-
पृच्छा आनन्दनमिति रमानाथः। इति भरतः॥
(यथा, रघुः। ११। ४३।
"सभाजने मे भुजमूर्द्धबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥"
सभाजयतीति। सभाज ऋ क प्रीतौ+ल्युः।
प्रीतिदायके, त्रि। यथा, महाभारते।४।१३।१०
प्रभूतनागाश्वरथं सभाजनं
समृद्धियुक्तं बहुपानभोजनम्।
मनोहरं काञ्चनचित्रभूषणं
गृहं महत् शोभयतामियं मम ॥")
सभापतिः, पुं, (सभायाः पतिः।) समाजाधि-
पतिः। (यथा, भागवते। ६। १७। ७।
"जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः।
अङ्कीकृत्य स्त्रियञ्चास्ते गतह्रीः प्राकृतो यथा॥")
द्यूतगृहस्वामी। इति केचित् ॥
सभासत् } पुं, (सभा+सद+क्विप्।) सभायां
सभासद् } सीदति उपविशति यः। तत्पर्य्यायः।
सभास्तारः २ सभ्यः ३ सामाजिकः ४। इत्य-
मरः ॥ परिषद्वलः ५ पर्षद्वलः ६ परिषदः ७
पार्षदः ८ परिसभ्यः ९। इति शब्दरत्नावली ॥
तल्लक्षणादि यथा। कात्यायनः।
"सभ्यैर्नावश्यवक्तव्यं धर्म्मार्थसहितं वचः।
शृणोति यदि नो राजा स्यात्तु सभ्यस्तदाऽनृणः॥"
सभ्यः सभायां साधुः। तथाविधानाह याज्ञ-
वल्क्यः।
"श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः।
राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये
समाः ॥"
श्रुताध्ययनसम्पन्नाः धर्म्मशास्त्रज्ञाः। कुलीनाः
सङ्करादि-दोषशून्यमातापितृवंशपरम्पराकाः।
एवम्भूताः सभासदः सभायां यथा सीदन्ति
तथा दानमानसत्कारैः राज्ञा कर्त्तव्याः। इति
व्यवहारतत्त्वम् ॥*॥ अन्यच्च।
"समः शत्रौ च मित्रे च धर्म्मशास्त्रविशारदः।
विप्रमुख्यः कुलीनश्च धर्म्माधिकरणे भवेत् ॥
कार्य्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ॥"
इति मत्स्यपुराणे १८९ अध्यायः ॥
बृहस्पतिस्तु सप्त पञ्च त्रयो वा सभासदो
भवन्तीत्याह।
"लोकवेदज्ञधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा।
यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा॥"
किञ्च।
"सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्म्मतः॥"
तत्र ब्राह्मणा अनियुक्ताः सभासदस्तु नियुक्ता
इति भेदः। तत्र नियुक्तानां यथावस्थितार्थ-
कथनेऽपि यदि राजान्यथा करोति तदासौ
निवारणीयोऽन्यथा दोषः। उक्तञ्च कात्यायनेन।
"अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः
तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः ॥"
इति मिताक्षरा ॥
सभास्तारः, पुं, (सभां स्तृणातीति। स्तृञ् आच्छा-
दने+"कर्म्मण्यण्" ३।२।१। इत्यण्।) सभा-
सद्। इत्यमरः॥ (यथा, महाभारते।२।४९।२।
"के च तत्र सभास्तारा राजानो ब्रह्मवित्तम॥")
सभिकः, पुं (सभा द्यूतसभा आश्रयत्वेनास्त्यस्येति
सभा+व्रीह्यादित्वात् ठन्।) द्यूतकारकः।
इत्यमरः ॥ दे सङ्घियार इति ख्याते। सभा
द्यूतमस्याश्रयत्वेनास्ति सभिकः विकारसंघेति
ष्णिकः। सभा द्यूतं सभा गृहमिति रुद्रः।
द्यूतं कारयति द्यूतकारकः अणन्तात् स्वार्थे
कः। इति भरतः॥ तत्पर्य्यायः।
"दुरोदरश्च निर्द्धनद्यूतकारकलग्नकाः।
सभिकः प्रतिभूश्चेति————॥"
इति जटाधरः ॥
(यथा, याज्ञवल्क्ये। २। २०२।
"ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्।
गृह्णीयात् धूर्त्तकितवादितराद्दशकं शतम् ॥")
सभीकः, पुं, द्यूतकारकः। इति शब्दरत्नावली ॥
सभोचितः, पुं, (सभायामुचितः।) पण्डितः।
इति धनञ्जयः ॥ सभायोग्ये, त्रि ॥
सभ्यः, पुं, (सभायां साधुः। सभा+"सभाया यः।"
४।४।१०५। इति यः।) साधुः। सभासद्।
इत्यमरः ॥ (यथा, मनुः। ८। १०।
"सोऽस्य कार्य्याणि संपश्येत् सभ्यैरेव त्रिभि-
र्वृतः ॥"
अस्मिन्नर्थे वाच्यलिङ्गेऽपि दृश्यते। यथा, रघुः।
१। ५५।
"तस्मै सभ्याः सभार्य्याय गोप्त्रे गुप्ततमेन्द्रियाः
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥")
सभिकः। इति जटाधरः॥
सभ्यः, त्रि, (सभा+यः।) प्रत्ययितः। इति
जटाधरः ॥ सभासम्बन्धी च ॥
सम्, व्य, समार्थः। प्रकृष्टार्थः। सङ्गतः। शोभनः।
इति शब्दरत्नावली ॥ समुच्चयः। इति हेम-
चन्द्रः ॥ चतुर्थोपसर्गः। इति व्याकरणम् ॥
अस्यार्थविशेषाः संशब्दे द्रष्टव्याः ॥
समः, त्रि, (समतीति। सम वैक्लव्ये+पचाद्यच्।)
सर्व्वम्। (अस्मिन्नर्थे सर्व्वनामसंज्ञा भवति।
यथा, मुग्धबोधे।
"नमः समस्मात् पूर्व्वस्मा अन्तरस्मा अमेध-
साम् ॥")
समानम्। इत्यमरः ॥ (अस्मिन्नर्थे सर्व्वनाम-
संज्ञा न भवति। यथा, मुग्धबोधे।
"समायेषु परार्येषां मुक्तयेऽर्थान्तराय च ॥")
साधुः। इति मेदिनी ॥
समः, पुं, (सम वैक्लव्ये+पचाद्यच्।) राशि-
विशेषाणां संज्ञाविशेषः। ते तु राशयः वृष-
कर्कटकन्यावृश्चिकमकरमीनाः। यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
मानस्य प्रकारविशेषः। स तु यदा गीतवाद्ययो-
स्तालः गायकस्य हस्तपादादिचालनञ्च एकदा
समभावेन पतति तदा भवति। इति सङ्गीत-
शास्त्रम् ॥ * ॥ वर्गमूलानयनार्थं अङ्कोपरि-
दत्त ऋजुरेखाविशेषः। यथा,—
"त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन्मूलं समे
तद्धृते।
त्यक्त्वा लब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं
न्यसेत् ॥"
इत्यादि लीलावती ॥
समकन्या, स्त्री, (समा विवाहतुल्या कन्या।)
विवाहोपयुक्ता। इति धनञ्जयः ॥ सदृश-
कुमारी च ॥
समकोलः, पुं, (समः कोलो यस्य।) सर्पः। इति
त्रिकाण्डशेषः ॥
समक्तः, त्रि, गमनकर्त्ता। संपूर्व्वं कानृधातोः
क्तप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥
समक्षं, त्रि, अक्ष्णोः समीपम्। संपूर्व्वाक्षिशब्दात्
अप्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकर-
णम् ॥ (यथा, कुमारे। ५। १।
"तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्व्वती
प्रियेषु सौभाग्यफला हि चारुता ॥")
समगन्धकः, पुं, (समास्तुल्या गन्धा गन्धद्रव्याणि
यत्र। कप्।) कृत्रिमधूपः। यथा,—
"हृकधूपे भक्तकारो गिरिः स्यात् समगन्धकः।"
इति शब्दचन्द्रिका ॥
समगन्धिकं, क्ली, (समस्तुल्यो गन्धोऽस्त्यस्येति।
ठन्।) उशीरम्। इति राजनिर्घण्टः ॥ तुल्य-
गन्धयुक्ते, त्रि ॥
समग्रः, त्रि, (समं समकालमेव ग्रसतीति।
ग्रह+डः।) सकलम् (यथा, रामायणे।
२। ५२। ८४।
"चतुर्द्दश हि वर्षाणि समग्राण्युष्य कानने।